National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 74-76
© 2025 NJHSR
www.sanskritarticle.com

**तन्मय सरकारः**
गवेषकः (PhD),
तिलकामाझि, भागलपुर विश्वविद्यालयः,
भागलपुरम्

# न्यायवैशोषिक दर्शने सृष्टितत्त्वम्

**तन्मय सरकारः**

## विषयस्य महत्त्वम् –

भारतीयदर्शन न केवलं भारतवर्षस्यापितु समग्र बिश्वे अकृत्तिमयुक्तिजाले स्वीयमहिमां प्रतिष्ठितमस्ति अत्र नास्ति संशयः। सजीवं निर्जीवञ्च प्रत्येकं वस्तु प्रकृतेः नियमनुसारेण निर्मितं वा नाशञ्च भविष्यति। सृष्टितत्त्वविषये भारतीयदर्शनेषु विभिन्नेषु मतम् उल्लिखितमस्ति, तेषु आस्तिकदर्शनमध्ये न्यायवैशोषिकदर्शनम् अन्यतमम्।

वैशेषिकसम्मतं षडपदार्थेषु द्रव्यमन्यतम पदार्थः। द्रव्यस्य लक्षणप्रङ्गे तर्कसंग्रहकार तस्य दीपिका टीकायामुल्लेखितमस्ति–द्रव्यत्त्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणम्।।[1] वैशेषिकसूत्रे नवद्रव्य-स्यल्लेखोपलभ्यते –

**पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्यानि ।।**[2]

अर्थात् पृथिवी- अप् - तेज-वायु-आकाश-दिक-काल-आत्मा-मनश्चेति।वैशेषिकसम्मत नवद्रव्येषु क्षिति-अप-तेज-मरुत्-आकाशञ्च एव पञ्च भौतिक द्रव्यानि। पञ्चसु भौतिक द्रव्येषु क्षिति – अप –तेज-मरुतस्य विशेषता भवति यत् एव निय्यानित्यो भवितुमहर्ति। एतेषां परमानुः नित्यरुपा। इदानीं क्षित्यादि चतुर्भुतानां सृष्टिः विषये आलोचना आगच्छति। वैशेषिकमतानुसारेणः क्षित्यादि चतुर्भूतं द्रव्यस्य उपादानकारणरुपेण स्वीक्रियते। अर्थात समवायीकारणः तद् तद् द्रव्यस्य (अवयवी द्रव्यस्य) अवयवभूयद्रव्यम्। एवमरुपेण अनन्तः तद् तद् परमाणवः निरावयवत्वत् तद् तद् परमाणुः तदुत्पन्न सावयवः द्रव्यस्य समवायीकारणम्। पुनः असमवायीकारणं तु तद् तद् अवयवसंयोगादि इति। असमवायीकारणमिदं पक्षान्तरे उपादानकारणस्य अन्तर्भवति इति कथ्यते। निमित्तकारणन्तु अदृष्टः अदृष्टात्मसम्वन्धःईश्वरश्च। तन्मध्ये ईश्वरः तु कतृरुपेण कार्यपदार्थं प्रति निमित्त कारणम् । यद्यपि सृष्टि-संहारयोर्मध्ये सृष्टेः उल्लेखं....आद्ये विद्यते । तथापि सरलं अवोधार्थं सृष्टेः पूर्वं संहारः प्रलयस्य वा विश्लेषणं कृतम् । श्रुति पुराणादि अनुसारेण प्रलयस्य विभागचतुष्टयं विद्यते । तद्यथा – नित्य – नैमित्तिक – प्राकृत – अत्यान्तिकं च। एतेषां सुषुप्तिः नित्यप्रलयः इत्युच्यते । यतोहि सुषुप्तिकाले जीवस्य देह – इन्द्रिय - मन – प्राण – वुद्धिः प्रभृति कार्यं तद् जीवस्य स्व स्व अविद्यायाम् अभिभूयमानं आसीत् । यतः दैनन्दिननिद्राकाले भवत्येव। अपरपक्षे तु नैमित्तिकप्रलयं भवति कार्यब्रह्म अर्थात् हिरण्यगर्भस्य (यस्य नामान्तरं ब्रह्मैव ) स्वस्य दिवसादि परिमाणे दिवसान्ते रात्रिसमये यदा ब्रह्मा निद्रावस्थायाम् याति तदा भू – भूव – स्व – अर्थात् स्वर्ग- मर्त्य – पातालः त्रैलोकस्यैष लयः अर्थात् विनाशो भवति। त्रैलोकस्यास्य प्रकृतिर्भवति हिरण्यगर्भस्य उपादानभूत समष्टिसूक्ष्मशरीरमेव। प्रकृतिप्रलयं भवति हिरण्यगर्भस्य ब्रह्मणः विदेह मुक्तिकाले स्थूलादि सकल भौतिक पदार्थानां विनाशपूर्वकं ईश्वरोपाधिभूत मायायाम्। प्रलयमिदं महाप्रलयरुपेनाभिधीयते।

**Correspondence:**
**तन्मय सरकारः**
गवेषकः (PhD),
तिलकामाझि, भागलपुर विश्वविद्यालयः,
भागलपुरम्

**वैशेषिकदर्शने सृष्टिप्रक्रियायां परमाणुवादालोचना**

वैशेषिकदर्शनसम्मतं नवद्रव्येषु क्षिति-अप्-तेज-वायोः अवस्थाद्वयं स्तः। चतुर्भुतेऽस्मिन् परमाणवः नित्यं ततो जातं यौगिकपदार्थमेवानित्यम्। जगत्यस्मिन् यौगिकवस्तुमात्रमेव सावयवं भवति। सांशवस्तुमात्रमेव उत्पतिः विनाशयुक्तं भवति। अंशः संयोजने तेषामुत्पत्तिः, वियोजने विनाशं भवति । यथा घटः, कपालद्वयं संयोगेनोत्पत्तिर्भवति। अर्थात् कपालस्य संयोगे घटस्योत्पत्तिः तद्विच्छिन्ने सति विनाशं जातम्। यस्योत्पत्तिरस्ति सैव कार्यं एवं कार्यमात्रं कारणजातम्। प्रसङ्गेऽस्मिन् अन्नंभट्टेनोक्तम्

कार्यनियतपूर्ववृत्ति कारणम् ।। कार्यं प्रागभावप्रतियोगि ।।[3]

अत एव घटपटादि जागतिक सावयववस्तुः कार्यत्वात् तेषां कारणमपि वर्तते । उपादाननिमित्तभेदेन कारणस्य भागद्वयमस्ति। वैशेषिकसम्मतं यौगिक सावयववस्तुः उपादानकारणमेव परमाणुः। निमित्त कारणं भवति ईश्वरेच्छा अदृष्टं वा। वैशेषिकमतानुसारेण परमाणुः भवति वस्तोः अविभाज्यं अच्छेद्यं नीरेट उपादानम् । परमाणौ कोऽपि शुन्यस्थानं नास्ति। अंशरहित्वात् तस्योत्पत्तिः विनाशमपि नैव भवति । परमाणुः यौगिकवस्तुनां उपादानकरणत्वात् परमाणोः कोऽपि कारणं नास्ति । परमाणवः संख्यायामनेकाः एवं परिमाणमाकारश्च समैवास्ति । परिमाणतः वैषम्यं नास्त्येव ते निश्चलं गतिहीनं च एव तिष्ठति । परमाणुः स्वशक्तिर्नास्ति । परन्तु यद्यापि परिमाणगत वैषम्य तथापि गुणगत वैषम्यं वर्तते। समजातीयक परमाणुः विशिष्टगुणयुक्तं भवति। यथा क्षितेः विशिष्टगुणः गन्धः,जलस्य रसः, तेजसःरूपं एवं वायोः स्पर्शम्। समजातीय परमाणुना सह विषमजीय परमाणोः गुणगतं वैषम्यं विद्यते। परमाणुरतिन्द्रियः, लौकिकप्रत्यक्ष असम्भवत्त्वात् अनुमानेन तस्यास्तित्वं ज्ञायते । परमाणवः निष्क्रियस्तथा गतिहीनत्वात् ते स्वशक्तौ जगतस्य सृष्टिकार्यं कर्तुं न शक्नोति । परमाणुः संयोगार्थं कोऽपि विशेषवाह्यशक्तेः आवश्यकता वर्तते । प्राचीनवैशेषिकाचार्याः मन्यन्ते यत् जीवस्य कर्मात् जातं अदृष्टशक्तिमेव(कर्मफलं) निमित्तकारणरूपे परमाणुन् संयोगं क्रियते एवं जीवस्य कर्मफलं लाभोपयोगी जगत् सृष्टिं करोति। परन्तु परवर्ती वैशेषिकाचार्याः ईश्वरमेव जगतस्य निमित्ताकारणरूपेण चिह्नितं करोति। तेषां मते जगतस्योत्पत्तिः उद्देश्ययुक्तं परिकल्पनायुक्तं च।

जगतस्योपादानकारणं परमाणुः एवं निमित्तकारणं भवति ईशवरः। ईश्वरः जगतसृष्टये निश्चलं परमाणुनानां गतिसञ्चारं क्रियते। तेषु परमाणुषु गतियक्तत्वात् परमाणुद्वयसंयोगेनोत्पन्नं भवति द्व्याणुक्। परमाणुकोऽयं द्व्याणुकं च दृष्टगोचरं नैव भवति। द्व्याणुकत्रयस्य संयोगेनोत्पन्नं भवति त्र्याणुकः वा त्रसरेणुः। अयं त्रसरेणुः प्रथमदृष्टिगोचरगतिशीलकणा। यथा गवाक्षरन्ध्रे पश्यति चेत दृष्टिगोचरं भवति अतिसूक्ष्म गतिशीलं भासमानं पदार्थमेव । अतःपरं त्र्याणुकचतुष्टयं संयोगेन उत्पन्नं भवति चतुराणुकः । अनेन प्रकारेणैव सूक्ष्मतः स्थूलः, स्थुलात् स्थुलतरम् घटपटादि जागतिक वस्तोः उत्पन्नं भवति ।

उल्लेखनीय विषयमेवास्ति वैशेषिकमतानुसारेण द्व्याणुकादि परमाणुः उत्पन्नार्थं समधर्मी परमाणुमेव प्रयोजनमस्ति । एवं प्रकारेण समजातीयकं परमाणुः मिलित्वा यथाक्रमे द्व्याणुकः, त्र्याणुकः, चतुराणुकः, प्रभृति क्रमाणुसारे स्थुलतः स्थुलतरः,क्षिति-अप्-तेज-मरुतादि चुभुतस्योत्पत्तिः भवति । एवं तदैव चतुर्भुतस्य पारस्पारिक संयोगमेव जागतिक वस्तुसमुहस्योत्पत्तिर्भवति ।

**न्यायदर्शने सृष्टितत्त्वम् :**

भारतीयेषु आस्तिकसम्प्रदायेषु न्यायदर्शनम् अन्यतमम् । न्यायमते उत्पत्तेः निमित्तकारणम् ईश्वरः एव । न्यायसुत्रे महर्षिगौतमेन षोडशपदार्थाः उल्लिखिताः। तेषु द्वितीयः प्रमेयः।प्रमेयपदार्थेषु आत्मनः उपस्थितिः दृश्यते, परन्तु तेषु षोडशपदार्थेषु ईश्वरोल्लेखः नास्ति। जीवस्य कर्मणः कर्मफलस्य च नियन्त्रकरूपेण न्यायसूत्रस्य चतुर्थाध्याये इश्वरोल्लेखः कृतः गोतमेन-

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्।।[4] न, पुरुषकर्माभावे फलानिष्पत्तेः।।[5]

तत्कारितत्वादहेतुः।।[6]

वात्सायणादिना मते उल्लिखितः प्रथमसूत्रम् पूर्वपक्षे।प्रागुक्तेन सूत्रेण महर्षि गौतमः मतमिदम् पूर्वपक्षरूपेण प्रकाशितवान् यत् जीवस्य कर्म निरपेक्षम् ईश्वरः एव कारणम्। जीवस्य कर्मवैफल्यम् दृश्यते अर्थात् कर्मकर्तुः जीवस्य कदाचित्त कर्मवैफल्यम् भवति, तदा जीवस्य कर्म कारणम् न भवति। इश्वरेच्छानुसारं जगत्सृष्टादिः सर्वजीवस्य सुखदःखादीनां विधानं च दृश्येते।

नैयायिकमतानुसारेण सृष्टेः मूलकारणमेव अतीन्द्रियपरमाणुषु सुप्तावस्थायामस्ति। गौतमादि नैयायिकाः तेषां ग्रन्थे युक्तौ च पुनरावृत्तिः कुर्वन्ति। न्यायसूत्रकारेणोक्तम्

न प्रलयोऽणुसद्भावात् ।।[7]

अर्थात् प्रलयः न वक्तुम् शक्नोति, नाम सर्वाभावमित्यपि वक्तुं शक्नोति । कारण, जन्यद्रव्यस्यावयवपरम्परायाः चरमविभागनन्तरं किमपि न तिष्ठति – इति वक्तुं न शक्नोति । यतोहि परमाणुः सत्तायुक्तास्ति । गौतमोक्तार्थः व्याख्या कर्तुं वात्सायाणाचार्येणोक्तम् –

विभागस्य च विभज्यमानहानिर्नोपपद्यते

तात्पर्यं भवति यस्य द्रव्यद्वयस्य विभाग जायेते तौ विभाजमान द्रव्यमिति। विभागमात्रं तद् द्रव्यद्वये जायते। अत एव चरमविभागमेव द्रव्यद्वये जायते तिष्ठते च । अर्थात् चरमविभागः अस्ति तथापि

तस्याधारः तद् विभाज्यमान द्रव्यद्वयं नास्ति। अर्थात् चरमविभागानन्तम किमपि न तिष्ठति – यत् कदापि उपपन्नं नैव भवति। यतोहि निराश्रय विभाग कल्पनामात्रमेव। सुतरां तद् चरमविभागस्योऽपि आश्रयः द्रव्यद्वयं स्वकार्यत्वात् परमाणु सिद्धिर्भवति । यतोहि तदैव अतिन्द्रियद्वयं द्रव्यमेव परमाणुद्वयम् । प्रचलितमतानुसारेण परमाणुद्वयस्य संयोगजन्यं सर्वप्रथमं यद् द्रव्यं जायते तस्य नाम द्व्याणुकः एवं तद् द्व्याणुकस्य संयोगानन्तरं यद् द्रव्यं जायते तस्य नाम भवति त्र्याणुकः वा त्रसरेणुः। त्रसरेणु अयं स्थुलत्वात् प्रत्यक्षगोचरः प्रथमद्रव्यम् । प्रथमे अत्रैव स्थुलत्व महत् परिमानं वा उत्पन्ने सति तस्य प्रथमप्रत्यक्षं भवति। यथा गवाक्षरन्ध्रे सूर्यकिरणेषु यत् गतिशीलं सूक्ष्मरेणु दृष्टिगोचरं भवति सैव त्रसरेणुः। अत्र त्रसिति शब्दस्यार्थो भवति गतिशीलरेणः। त्रसरेणुकोऽयं प्राचीनकालादेव प्रचलितमस्ति विषयेऽस्मिन् नास्ति संशयलेशः। यतोहि मनुनक्तम् –

जलान्तर्गते भनौ यत् सूक्ष्मं दृश्यते रजः ।
प्रथमं तत् प्रमाणाना त्रसरेणुं प्रचक्षते ।।[8] परमाणुः परिचयः प्रदातुं महर्षिगौतमोक्तं
परं वा त्रुटेः।[9]

अर्थात् त्रटेः परं परमाणुरिति। वाचस्पतिमिश्रं प्रभृति पूर्वाचार्येणोक्तं यत् पूर्वोक्त त्रसरेणोः नामान्तरमस्ति त्रुटिः। नव्यनैयायिकः रघुनाथशिरोमण्याचार्येणोक्तम् – त्रुटावेव विश्रमात्

तात्पर्यमस्ति सैव त्रसरेण्यामेव विश्रामः । सैव त्रसरेणोः कोऽपि अंशं नास्ति यतोहि सूक्ष्मं नित्यद्रव्यश्च । विषयेऽस्मिन् मीमांसकाः सहमतं पोषयन्ति । परन्तु महर्षिगौतम पूर्वोक्त पर शब्देन अवधारणस्तथा वा शब्देन त्रसरेणुः परमाणु नास्ति तदैव व्याक्तं करोति । परन्तु परमाणुः अतीन्द्रियोऽयं स्पष्टरूपेण व्याक्तं कृतम् – **"अतीन्द्रियत्वादनुनां"।**

परमाणुः वादी वैभाषिकसम्प्रदायेषु कोऽपि सम्प्रदायस्य गवाक्षरन्ध्रगत सूर्यकिरणेषु दृश्यमानः त्रसरेणुं परमाणुः नाम्ना स्वीकरोत्यपि सन् महानैयायिक उद्योतकराचार्यः तस्य न्यायवार्तिके तेषां मतानामुल्लेखपूर्वकं खण्डनं कृत्वा उक्तवान् यत् दृश्यमानः त्रसरेणुरपि अवयवः अंशो वा विद्यते, यतोहि ते अस्माकं वहिरिन्द्रियग्राह्यम् । अर्थात् वहिरिन्द्रियग्राह्यद्रव्यमात्रमेव सावयवम्। न्याय-वैशेषिक सम्प्रदायस्य अर्वाचीनः नैकाचार्यः मतानुसारेण त्रसरेणुरेव अंशः विद्यते एवं विभागस्योऽयं परववर्ती विभागोऽपि विद्यते । अनुमानप्रमाणसिद्धोऽयम् । त्र्यासरेणो अवयवः द्व्याणुकः ,पुनः द्व्याणुकस्यावयवः परमाणुः ..अयं न्याय-वैशेषिकसम्प्रदायस्य प्रचलित मतमस्ति । एवं प्रकारेण निरवयव परमाणुः यदि अवश्यं स्वीकार्यं भवति तर्हि परमाणुद्वयस्य संयोगोऽपि अवश्य स्वीकरणीयम्। यतोहि परमाणुद्वयस्य विभाजनेन प्रलयं एवं संयोगेन सृष्टिः भवितुमर्हति ।

**सन्दर्भसूचयः –**


[1]अन्नंभट्ट, तर्कसंग्रह,द्रव्यभेदनिरुपनम्
[2]कणादः, वैशेषिकसूत्र, प्रथमाध्यायः, प्रथमाह्निकः
[3]अन्नंभट्ट, तर्कसंग्रह, गुणनिरुपणम्
[4]गौतमः, न्यायसूत्रम्, चतुर्थोऽध्यायः, प्रथमाह्निकः
[5]गौतमः, न्यायसूत्रम्, चतुर्थोऽध्यायः, प्रथमाह्निकः
[6]गौतमः, न्यायसूत्रम्,चतुर्थोऽध्यायः, प्रथमाह्निकः
[7]गौतमः, न्यायसूत्रम्, चतुर्थोऽध्यायः, द्वितीयाह्निकम्
[8]महर्षि मनु, मनुस्मृति, अष्टमोऽध्यायः, श्लोक-१३२,
[9]गौतमः, न्यायसूत्रम्, चतुर्थोऽध्यायः, द्वितीयाह्निकम्